आकाशवाणी

दिनाङ्क :- 30.05.2025 प्रात: - 06:55

## प्रधानमन्त्रि-बिहार

प्रधानमन्त्री नेरन्द्र मोदी अद्य बिहारे उत्तर-प्रदेशे च षण्णवति-सहस्रकोटि रूप्यकाणां व्ययेन विकास-परियोजनाया: शुभारम्भं करिष्यति। बिहारे श्री मोदी रोहतासस्य विक्रमगंजे विंशत्युत्तर -पञ्चशताधिक-अष्टचत्वारिंशत्-सहस्र-कोटि-रूप्यकाणां व्ययेन विकास-परियोजनानामुद्घाटनं शिलान्यासं च राष्ट्राय समर्पण करिष्यति। उत्तर-प्रदेशे प्रधानमन्त्री अद्य मध्याह्ने कानपुरे नवशताधिक विंशति-सहस्र-कोटि-रूप्याकाणां व्ययेन विकास-परियोजनानाम् अनावरणं विधास्यति।

## प्रधानमन्त्रि-पटनानगरे

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य पटनानगरे जयप्रकाशनारायणअन्ताराष्ट्रिय विमानस्थात्रस्य नवीनटर्मिनलभवनस्य उद्घाटनं कृतम्। प्रधानमन्त्रिणा बिहटा - विमानस्थानकस्य नूतननागरिकक्षेत्रस्य आधारशिला अपि स्थापिता । इयम परियोजना १४१० दशाधिकचतुर्दश- शत कोटिरूप्यक- व्ययेन अस्ति। प्रधानमन्त्रिणा पटनानगरे भव्यं मार्ग-प्रदर्शनमपि कृतम् । प्रधानमन्त्रिणा पश्चिमबङ्गे, सिक्किमप्रदेशयो: च अनेकासां विकासपरियोजनानां उद्घाटनं, शिलान्यासः च कृतः ।

## प्रधानमन्त्री-यात्रा

प्रधानमन्त्री पश्चिमबङ्गस्य सिक्किमस्य च अनेकविकासपरियोजनानां उद्घाटनं कृत्वा शिलान्यासं कृतवान्। श्री मोदी पश्चिमबङ्गस्य अलीपुरदुआरमण्डले नगराधारिताया: वातरन्ध्रि- वितरणपरियोजनायाः शिलान्यासम् कृतवान्। सः अवदत् यत् 1070 सप्तत्यधिक एक सहस्र कोटिरूप्यकाणां एषा परियोजना अलीपुरदुआर-कूचबिहार-मण्डलयोः जनानां लाभाय भविष्यति। मोदी अवदत् यत् विकसितभारतस्य निर्माणे पश्चिमबङ्गस्य महत्त्वपूर्णा भूमिका अस्ति। अद्यत्वे यदा भारतं विकसितराष्ट्रं भवितुं गच्छति तदा बङ्गालस्य सहभागिता अपेक्षिता अत्यावश्यकी चापि अस्ति । बङ्गालस्य विकासः भारतस्य भविष्यस्य आधारः अस्ति।

## शिवराज सिंह

केन्द्रीय कृषि मंत्री शिवराज-सिंह चौहान: कांग्रेसोपरि आरोपं कृतवान् यत् कांग्रेसदले न्यूनतम-समर्थन-मूल्यं स्वीकृत्य कृषकाण मन: आटयति । तस्य कथनमस्ति यत् कांग्रेसदलस्य शासने सर्वेषां शस्यानां एम.एस.पी. दर: तुलनायां नाममात्रेण अधिक: आसीत्। भाजपा-प्रशासनेन समर्थन-मूल्ये अधिका वृद्धि: कृता।

## विदेश-जयशंकर

विदेशमन्त्रिणा डॉ. एस.जयशंकरेण प्रोक्तं यत् भारत-न्यूजीलैंडयो: मध्ये विभिन्नेषु क्षेत्रेषु संबंधा: विस्तीर्यन्ते। नव-दिल्ल्यां न्यूजीलैंडस्य उपप्रधानमंत्रिण: विदेशमन्त्रिण: च विस्टन पीटर्सेण सह उपवेशनावसरे इयं टीकाकृता। श्री पीटर्स: द्विदिवसीय यात्रायां दिल्लीं संप्राप्तावान्।

## प्रचण्डवृष्ट्या

प्रचण्डवृष्ट्या नारङ्गवर्णस्य संचेतना संचारिता जम्मू-कश्मीर, पञ्जाब, हरियाणा, राजस्थान, उत्तरप्रदेश, मध्यप्रदेश, छत्तीसगढ, ओडिशा, पश्चिमबंगाल, असम इत्यादिषु स्थानेषु वायव्य-मध्य-पूर्व-भारतेषु अतिवृष्टिकारणात् अद्य ऋतुविभागेन नारङ्ग-सचेतना संचारिता। पत्रकारैः सह वार्तालापं कुर्वन् विभागस्य वैज्ञानिकः अखिलश्रीवास्तवः अवदत् यत् पञ्जाब-हरियाणा -जम्मू-कश्मीर-सहितस्य देशस्य वायव्य-प्रदेशे मेघगर्जनस्य, प्रचण्डवायोश्च सम्भावना वर्तते। सः अवदत् यत् दिल्लीनगरे वज्रपातः, प्रचण्डवायुः, लघुवृष्टिः च भवितुम् अर्हति, श्वः न्यूनात् मध्यमा वर्षा अपेक्षिता ।

## आईपीएल

आई.पी.एल. विंशति विंशति क्रिकेट स्पर्धायाम् रॉयल-चैलेंजर्स बैंगलुरू दलेन प्रथम साफल्ये पञ्जाब किंग्स दलं अष्ट क्रीडकाणां पुरस्सरं पराजित्य श्रृङ्खलायां प्राविष्टवत्। अद्य मुम्बई इण्डियंस दलं गुजरात-टायटंस् दलं स्पार्धिष्यते।

।। इति वार्ता:।।